दिनाङ्क ७.६ — शास्त्री तृतीयखण्ड, विषय-व्याकरण
ग्रन्थ-न्यायसिद्धान्तमुक्तावली, अनुमानखण्डम्

प्रश्न- पूर्वपक्षव्याप्ति सामान्यं समुपस्थितं लेख्य:

उत्तर- उपोद्घातप्रयोजकभावः उपोद्घातः। संगतिश्च बोध्या सप्रसङ्गा उपोद्घातो हेतुतावसरस्तथा। निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते इत्यभियुक्तोक्तेः। तत्र व्याप्तिः का इति प्रश्नः संगच्छते।

व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः।
साध्यवत्पदलक्षणया साध्यवत्प्रतियोगिकपरं तस्य च भेदसम्बन्धेन अन्यपदार्थैकदेशे भेदेऽन्वयः न तु साध्यवत्पदार्थस्य प्रतियोगितासम्बन्धेन भेदे नामार्थयोरभेदसम्बन्धेनान्वयस्याव्युत्पन्नत्वात्। भेदवत्श्च सप्तम्यर्थनिरूपितत्वसम्बन्धेन वृत्तिस्वरूपे सम्बन्धपदार्थे तस्य च प्रतियोगितासम्बन्धेनाभावे। एवं च साध्यवत्प्रतियोगिकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरिति तदर्थः।

वह्निमान् धूमादित्यादौ साध्यो वह्निः साध्यवान् महानसादि तदन्यो जलह्रदादि तद्वृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वान्नाऽतिव्याप्तिः।

अत्र येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्यः अन्यथा समवायसम्बन्धेन वह्निमान् वह्न्यवयवः तदन्यो महानसादिः तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात्।

अर्थात् साध्यतावच्छेदकसम्बन्धावच्छिन्ना या साध्यनिष्ठाऽवच्छेदकता तन्निरूपितावच्छेद्यतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपितवृत्तित्वाभावो व्याप्तिरित्यर्थः। एवं च समवायेन इति प्रतीतिसाक्षिकभेदीयप्रतियोगितावच्छेदकता वह्निनिष्ठा सा च न साध्यतावच्छेदकसम्बन्धावच्छिन्ना या च साध्यतावच्छेदकसम्बन्धावच्छिन्ना संयोगेन वह्निमान्नेति भेदीया प्रतियोगितावच्छेदकता तन्निरूपकप्रतियोगिताकभेदश्च पर्वत इति नाव्याप्तिः।

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः तेन यत्किंचित् वह्निमतो महानसाद्भिन्ने पर्वतादौ

धूमस्य सत्वेऽपि न क्षतिः।
येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यवृत्तित्वं वाच्यम्, तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्वेऽपि न क्षतिः। अर्थात् साध्यतावच्छेदकसम्बन्धावच्छिन्ना साध्यतावच्छेदकमात्रावच्छिन्ना या साध्यनिष्ठावच्छेदकता तन्निरूपितावच्छेदकतावती या प्रतियोगिता तन्निरूपकभेदवन्निरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्ना वृत्तिता तदभावो व्याप्तिः। एवं च संयोगेन वह्निमान्नेति प्रतीति ~~साक्षि~~ साध्यभेदवद् धूमावयवनिरूपिता समवायसम्बन्धावच्छिन्ना वृत्तिता यद्यपि धूमे वर्तते तथापि साध्यवद्भिन्ननिरूपितहेतुतावच्छेदकसंयोगसम्बन्धावच्छिन्ना वृत्तिता अभावो वर्तत एवेति नाव्याप्तिः।

साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः, तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि नातिव्याप्तिः।

अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्च ऐक्यात् साध्यवदन्यस्मिन् गुणादौ वृत्तित्वं नास्ति तथापि हेतुतावच्छेदकरूपेणाऽवृत्तित्वं वाच्यम्, हेतुतावच्छेदकं वृत्तितानवच्छेदकम्, इति तथा च तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकस्य नियमेन विशिष्टसत्तात्वस्य गुणाद्याधेयतानवच्छेदकत्वान्नाव्याप्तिः।

अमरनाथ मिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
सुखसेना पूर्णिया

दिनांक 7-6-21 उपशास्त्री द्वितीय वर्ष, विषय-व्याकरण
ग्रन्थ- सिद्धान्त कौमुदी (हलन्त पुल्लिङ्ग, प्रकरणम्)

1- अष्टौ - अष्टन् शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण जस् विभक्तौ अनुबन्ध लोपे। जश्शसोर्जश्शसोः षडिति संज्ञा लोपको सपोरजादि विभक्तौ इत्यात्वं प्राप्नोति तथापि अष्टन शब्दात् परयो विधानसामर्थ्यात् अष्टाभ्य औश् इति शित्वात् सर्वस्य स्थाने औ आदेशे अष्टनो आकारादेशे वृद्धिरेचि इत्यनेन वृद्धौ अष्टौ पदं साधु जातम्।

प्रश्न2- ऋत्विग्दधृक इति सूत्रं विलिख्य तस्य व्याख्या कार्या।

उत्तर- ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च

व्याख्या - उष्णिगन्तं प्रथमान्त पदम् अञ्चु युजि क्रुञ्चामिति पञ्चम्यर्थे षष्ठी तथा च ऋत्विगादयः उष्णिगन्ताः शब्दाः क्विन्नन्ता निपात्यन्ते। अञ्चु प्रभृतिभ्यः क्विन् इति सूत्रार्थः।

3 ऋत्विक्, ऋत्विग- ऋतु शब्दे उपपदे यज धातोः ऋत्विग्दधृक् -- इत्यादिना क्विन् प्रत्यये। ककारस्य लशक्वतद्धिते इति सूत्रेण नकारस्य हलन्त्यम् इत्यनेन इत् संज्ञायां तयोर्लोपे, इकारस्य उच्चारणार्थत्वे यजः सम्प्रसारणे यणि, कृदतिङ् इति प्रत्ययस्य कृत संज्ञायाम् वेरपृक्तस्य इति वस्य लोपे। कृदन्तत्वात् कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिक संज्ञायाम्, स्वौजस् इति सूत्रेण सु विभक्तौ हल्ङ्याभ्यो दीर्घात् इति सुलोपे क्विन्प्रत्ययस्य कुः इति कुत्वस्यासिद्धत्वात् चोः कुः इति कुत्वेन गकारे वाऽवसाने इति चर्त्व विकल्पे ऋत्विक्, ऋत्विग इति रूप द्वयं सिद्धम्।

4- पन्थाः - पथिन शब्दात् अर्थवदिति प्रातिपदिक संज्ञायाम्, स्वौजस् इति सु विभक्तौ पथिन सु इति जाते, पथिमथ्यृभुक्षामात् इति नकारस्य आकारादेशे, पथि आ सु इति जाते, इतोऽत् सर्वनामस्थाने इत्यनेन थकारोत्तरवर्तिनः इकारस्य अत्वे पथ आ सु इति जाते थो न्थः इत्यनेन थकारस्य न्थ आदेशे, पन्थ आ सु इति जाते अकः सवर्णे दीर्घः इत्यनेन अकारयोः सवर्णदीर्घे अनुबन्ध लोपे सस्य रुत्वे विसर्गे पन्थाः इति सिद्धम्।

अमरनाथ मिश्र
स॰ प्रो॰ व्याकरण
रा॰ उ॰ सं॰ म॰ विद्यालय
[illegible]

दिनांक ८-२१

शास्त्री प्रथम खण्ड, विषय-व्याकरण
ग्रन्थ प्रौढमनोरमा (परिभाषाप्रकरणम्)

प्रश्न – इको गुणवृद्धी अस्य सूत्रस्य मनोरमोक्तदिशा व्याख्या कार्या:

उत्तर – गुणवृद्धिशब्दाभ्यां, एतच्च पूर्वसूत्राभ्यां गुणवृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति मे गुणवृद्धी इति योजनया लभ्यते। तेन द्युनादिव औत्, द्योः, त्यदादीनाम: सः इमम् षष्ठ्यन्त मिति। स्थाने षष्ठ्यन्तस्यानुकरणस्य स्वरूपपरतया नपुंसकात् सोर्लुगिति। पदमिति – तच्च संभवति सामानाधिकरण्ये इगन्तस्याङ्गस्येत्यादि क्रमेण सम्बध्यते। मिदेर्गुणः मृजेर्वृद्धिः इत्यादौ तु समानाधिकरण्यासंभवान्मिदेर्मृजेः अवयवस्येति सम्बध्यते।

यत्तु – इक एव स्थाने स्तः इति प्राचां व्याख्यानम्, यच्च तट्टीकाकृतोक्तम् नियमप्रसंगेन पर्यायः। तत्सर्वं भाष्यविरोधादुपेक्ष्यम्। तच्छेषपक्ष इयामित्वापदोपस्थितिपक्षस्यैव भाष्यसमर्थितत्वादित्याहुः। तच्छेषपक्षेऽपि दूषणं द्वारस्तु शब्दकौस्तुभे अस्माभिः स्पष्टीकृतः।

एवं व्याख्यानस्य मिल्लति इत्यादौ दोषवारणाय इक्परिभाषा मन्येन। ...इत्यत्रापि ...इति पक्षेऽपि ...ति तस्य ...णा समानः ...तरा ...तीति। तथा च ... तव्यव ...स्य गुण इति व्याख्यानेन न दोषः। इकोऽपि उरण् गुणः इशः इति योगं विभज्य इशः इत्यत्र उः इत्यनुवर्त्य इश धात्ववयव ...स्य गुण इति व्याख्यानान्न दोषः। क्षिपं ... इयोरिति स्थूलदूर इत्यत्र 'यणादिपरम्' इत्यत्र एको योगविभागः पूर्वस्य च गुणः इति द्वितीयः। अत्र व्याख्यानात् इक् ...ायोरेवानुवृत्तिः। स्थूलादयो निवृत्ताः। तेषां च इको गुणः इति गुणेन रूपसिद्धिः। यणादीति लुप्तपञ्चम्यन्तः षष्ठीतत्पुरुषः, तस्य चावृत्त्या पूर्वस्य परम इति शब्दाभ्यां सम्बन्धः। तथा च द्विप्र ...र्येण आदि भूतात्समारा इकाराच्च पर णत्वं लुप्यते, ततः पूर्वस्य च गुण इति व्याख्यानान्न दोषः

यत्तु प्राचोक्तमन्त्यादचः पर इति तन्न श्रेमुषादीनाम् इत्यादावन्त्यस्याचो
ऽसंभवात् । तस्यैवान्तावयव इति । तेन नृपुणीत्यादौ अङ्गस्य
नान्तत्वे न दीर्घः सिद्धः । परादित्वे स नासिध्येत । अभक्तत्वे तु
नदिलिङ् इत्यत्र नहाभ्रे लिङः इति स्वरिशि अरुद्धिषद् इति
नुमोऽनुस्वारो न स्यात्, अपदान्तत्वात् ।

यत्तु, अभक्तत्वे नृपुणीति दीर्घो न स्यादिति तन्न, "नेदादिमिदृणां
स्यादि नुमुपाग" इत्यङ्गसंज्ञासूत्रस्थ वार्तिकेनैव दूषितं प्रायम् ।
स्थानेयोगेति स्थानेयोगोऽस्याः इति विग्रहः । निपातनादेत्वम् ।

अनेकविधीति रिति स्थानाय गुणप्रमाणकृतम् । तेन चेता
स्तोतेत्यत्र प्रमाणात् अन्तर्यवान्नकारो न ।

तस्मिन्निति सप्तम्यन्तानुकरणम् । निःशब्दो नैरन्तर्यपरः ।
दिशिरुच्चारणं प्रक्षेपः । एवं च सप्तम्यन्तार्थोऽव्यवहिते
उच्चारिते सति पूर्वस्य कार्यमिति वाच्यार्थः, तथा परिभाषाद्वयो
पस्थिता सप्तम्यन्तपञ्चम्यन्तपदयोरर्थौ परिष्कृतिलिङ्गम् ।
अपि याणिन्युक्त व्यवहितेऽव्यवहिते च सति प्राप्तेऽव्यवहित
एवेति पूर्वस्य परस्य च प्राप्तं पूर्वस्यैवेति च नियम्यते ।

तस्मादित्युत्तरस्य : "तस्मादित्युत्तरस्यादेः" इति तु नास्ति सूत्रम्
आदेः इत्यंशस्य सर्वादेशबाधकत्वापत्तेः, सिद्धान्ते तु
परत्वात् सर्वादेशत्वं बाधकमित्युपपद्यमेव वक्ष्यति ।


अमरनाथमिश्र
एसो० प्रो० व्याकरण
रा० उ० सं० म० वि०
रुदावलि ना प्रार्थ